प्रवेश सं० १८११८१ विषयः पुराणेतिहासम् क्रम सं०

नाम पौषशुक्लपुत्रदैकादशी माहात्म्यम् (ब्रह्माण्डे) ग्रन्थकार

पत्र सं० १-४

श्लोक सं० अक्षर सं० (पंक्तौ) ३८ पंक्ति सं० (पृष्ठे) १०

आकार: १०" × ४.४" लिपि: दे.ना. आधार: का.

14506

वि० विवरणम् पू०

पी० एस० यू० पा०--११ एस० सी० ई०--१६५९--५०,०००

न. ३७९६

Indira Gandhi National Centre for the Arts

महोदरसंग्रहे
८२६

श्री

Indira Gandhi National
Centre for the Arts

ए॰पौ॰शु॰

१

२०

श्रीगणेशायनमः॥ युधिष्ठिरउवाच॥ ॥ कथितावैत्वयाकृष्णसफलैकादशीशुभा॥ कथयस्वप्रसादेन
शुक्लापौषस्ययाभवेत्॥१॥ किंनामाकोविधिस्तस्याःकोदेवस्तत्रपूज्यते। कस्मैतुष्टोहृषीकेशस्त्वमेवपुरु
षोत्तम॥२॥ श्रीकृष्णउवाच॥ शृणुराजन्प्रवक्ष्यामिशुक्लापौषस्ययाभवेत्। कथयामिमहाराजलो
कानांहितकाम्यया॥३॥ पूर्वेणविधिनाराजन्कर्त्तव्यैषाप्रयत्नतः। पुत्रदानामनाम्नासासर्वपापह
रापरा॥४॥ नारायणोधिदेवोस्याःकामदःसिद्धिदायकः। नातःपरतराकाचित्त्रिषुलोकेषुसचराचरे॥५॥
विद्यावंतंयशस्वंतंकरोतिचनरंहरिः॥ शृणुराजन्प्रवक्ष्यामिकथांपापहरांपरां॥६॥ भद्रावत्यांपुरीपू
र्वेआसीद्राजासुकेतुमान्॥ तस्यराज्ञीतुयातस्यचंपिकानामवर्त्तते॥७॥ पुत्रहीनेनराज्ञावैकालो
नीतोमनोरथैः। नैवात्मजंनृपोलेभेवंशकर्त्तारमेवच॥८॥ तेनैवराजधर्मेणचिंतितंबहुकालतः। राम॰
किंकरोमिक्वगच्छामिसुतप्राप्तिःकथंभवेत्॥९॥ नराष्ट्रेनपुरेसौख्यंलेभेराजासुकेतुमान्। शैव्यया १
कांतयासार्द्धंमहदुःखितोभवत्॥१०॥ तावुभौदंपतीनित्यंचिंताशोकपरायणौ। पितरोस्यजलं

दत्तंकवोष्णमुपभुंजते॥११॥ राज्ञःपश्चान्नपश्यामोयोस्मान्संतर्पयिष्यति। इत्येवंसंस्मरंतोस्यपि
तरोदुःखिताभवन्॥१२॥ नबांधवानमित्राणिनामात्यासुहृदस्तथा। रोचंतेतस्यभूपस्यनगजाश्व
पदातयः।१३। नैराश्यंभूपतेस्तस्यनित्यंमनसिवर्त्तते॥ नरस्यपुत्रहीनस्यनास्तिवैजन्मनःफलं॥१४॥
अपुत्रस्यगृहंशून्यंहृदयंदुःखितंसदा। पितृदेवमनुष्याणांनानृणत्वंसुतंविना॥१५॥ तस्मात्सर्व
प्रयत्नेनसुतमुत्पादयेन्नरः। इहलोकेयशस्तेषांपरलोकेशुभागतिः॥१६॥ येषांतुपुण्यकर्त्तॄणांपुत्र
जन्मगृहेभवेत्। आयुरारोग्यसंपत्तिस्तेषांगेहेप्रवर्त्तते॥१७॥ पुत्रजन्मभवेत्तेषांलोकानांपुण्य
कारिणां। पुण्यंविनानवप्राप्तिर्विष्णुभक्तिंविनातथा॥१८॥ पुत्रस्यसंपदोवापिविद्यायाइतिमेम
तिः। एवंचिंतयमानोसौनशर्मलभतेनृपः॥१९॥ प्रत्यूषेचिंतयेद्राजानिशीथेचिंतयेत्ततः।
स्वयमात्मविनाशंचचिंतयामाससुकेतुमान्॥२०॥ आत्मघातेदुर्गतिंचचिंतयित्वातदानृपः। दृष्ट्वा

Indira Gandhi National Centre for the Arts

ए॰पो॰मु॰

२

२१ त्मा देहं पालितमपुत्रत्वं तथैव च॥२१॥ पुनर्विचार्य्य तत्र बुध्या आत्मनो हितकारणं। अश्वारूढस्ततो राजा जगा
मगहनं वनं॥२२॥ पुरोहितादयः सर्वे न जानंति गतं नृपं। गंभीरे विपिने राजा मृगपक्षिनिषेविते॥२३॥ विचचार तदा रा
जा वनवृक्षान्विलोकयन्। वटानश्वत्थबिल्वांश्च खर्जूरान्पनसांस्तथा॥२४॥ बकुलान्सप्तपर्णांश्च तिंदुकांस्तिल
कानपि। शालांस्तालांस्तमालांश्च ददर्श सरलान्नृपः॥२५॥ इंगुदीककुभांश्चैव श्लेष्मातान्बदरीस्तथा। शल्लकी
करमर्दांश्च पाटलान्खदिरानपि। शाकांश्चैव पलाशांश्च शोभितान्ददृशे नृपः॥२६॥ मृगान्व्याघ्रवराहांश्च सिंहान्
शाखामृगानपि। गवयान्कृष्णसारांश्च शृगालान्शशकानपि॥२७॥ वनमार्जारकान्नृक्षान्शल्लकांश्च
मरानपि। ददर्श भुजगान्राजा वल्मीकाद्विनिःसृतान्॥२८॥ तथा वनगतान्मत्तान्कलभैस्सहसंगता
न्। यूथपांश्च चतुर्दंतान्करिणीगणमध्यगान्॥२९॥ तान्दृष्ट्वा चिंतयामास आत्मनः सगजान्नृपः। तेषां राम॰
मध्ये विचरन्राज शोभामवाप ह॥३०॥ महदाश्चर्यसंयुक्तं ददर्श विपिनं नृपः। क्वचिच्छिवारुतान्शृण्वन्उ २

लूकानां रवं तथा॥३१॥ तांस्तान्पक्षिमृगान्पश्यन्बभ्राम वनमध्यतः। एवं ददर्श गहनं नृपो मध्यं गते रवौ॥३२॥
क्षुत्तृड्भ्यां पीडितो राजा इतश्चेतश्च धावति। चिंतयामास नृपतिः संशुष्कगलकंधरः॥३३॥ मया तु किं कृतं कर्म ये
न दुःखं परीदृशं मया। देवास्तोषिता यज्ञैः पूजाभिश्च सदा॥३४॥ तथैव ब्राह्मणा दानैस्तोषिता मिष्टभोजनैः। प्रजाश्चैव
मया काले पुत्रवत्परिपालिता॥३५॥ कस्माद्दुःखं मया प्राप्तमीदृशं दारुणं महत्। इति चिंतापरो राजा जगामैवाग्रतो
वनं॥३६॥ सुकृतस्य प्रभावेन सरो दृष्टमनुत्तमं। मानसं स्पर्धमानं च पद्मिनीपरिशोभितं॥३७॥ कारंडवैश्चक्रवा
कैः राजहंसैश्च शोभितं। मकरैर्बहुभिर्मत्स्यैरन्यैर्जलचरैर्युतं॥३८॥ समीपे सरसस्तत्र मुनीनामाश्रमान्नृपः द
दर्श राजा लक्ष्मीवान्शकुनैः शुभदर्शिभिः॥३९॥ प्रफुल्लरततरं नेत्रमपसव्यकरस्तथा। स्फुरते हि नृपतेस्तस्य क
थयन्शोभनं फलं॥४०॥ तस्य तीरे मुनिं दृष्ट्वा कुर्वाणं नैगमं जपं। हर्षमाप महाता दिष्टो बभूव नृपसत्तमः॥४१॥
अवतीर्य हयात्तस्मात्मुनीनामग्रतः स्थितः। पृथक्पृथक्ववंदे सौ च मुनीस्तान्संशितव्रतान्॥४२॥ कृ
तांजलिपुटो राजा दंडवच्च पुनः पुनः। प्रत्यूचुस्ते पि मुनयः प्रसन्ना नृपते वयं॥४३॥ राजोवाच॥

Indira Gandhi National
Centre for the Arts

॥

ए॰पो॰शु॰ केभवंतोऽत्र तप्यंते के वा यूयं भवतां मिथः किमर्थं संगता यूयं सत्यं वदत मेऽग्रतः ॥४४॥ मुनय ऊचुः ॥ विश्वे
३ देवा वयं राजन् स्नानार्थमागताः । माघो निकटमायात एतस्मात्त्वं च मे हि नि ॥४५॥ अद्य एकादशी राजन् पुत्र
दानाम नामतः पुत्रं ददाति सा विद्धि पुत्रदा वाञ्छितान् नृप ॥४६॥ राजोवाच ॥ ॥ एष वै संशयो मह्यं पुत्रस्यो
२२ त्पादने महान् यदि तुष्टा भवंतो वै पुत्रो मे दीयतां तदा ॥४७॥ मुनय ऊचुः ॥ अद्यैव दिवसे राजन् पुत्रदानाम
वर्त्तते । एकादशीति विख्याता क्रियतां व्रतमुत्तमं ॥४८॥ अभिषेकस्ततोऽस्माकं केशवस्य प्रसादतः ॥
अवश्यं तव राजेंद्र पुत्रप्राप्तिर्भविष्यति ॥४९॥ इत्येवं वचनं तेषां कृतं राज्ञा व्रतोत्तमं ॥ मुनीनामुपदे
शेन पुत्रदाया विधानतः ॥ द्वादश्यां पारणं कृत्वा मुनीन्नत्वा पुनः पुनः ॥ आजगाम गृहं राजा राज्ञी
गर्भमथादधौ ॥५१॥ पुत्रो जातस्तथा काले तेजस्वी पुण्यकर्मकृत । पितरं तोषयामास प्रजास्वामी
बभूव सः ॥५२॥ एतस्मात्कारणाद्राजन् कर्त्तव्यं पुत्रदाव्रतं लोकानां तु हितार्थाय तव चाग्रे कथितं म राम॰
या ॥५३॥ एकचित्तास्तु ये मर्त्याः कुर्वंति पुत्रदाव्रतं ॥ पुत्रान् प्राप्येह लोके तु मृतास्ते स्वर्गगामिनः ॥ ३

ए॰पो॰ ॥५४॥ पठनाच्छ्रवणाद्राजन्नग्निष्टोमफलं लभेत् ॥ इति श्री ब्रह्मांडपुराणे पौषशुक्लपक्षे पुत्रदैका
४ दशीमाहात्म्यं ॥ ॥ शुभमस्तु ॥ ॥ छ छ ॥ ॥ छ छ ॥ ॥ छ ॥ ॥
२३

राम॰
४

Indira Gandhi National
Centre for the Arts

Indira Gandhi National
Centre for the Arts